International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 05-07
© 2026 IJMH
www.themultijournal.com
Received: 13-08-2026
Accepted: 31-08-2026
Publish : 02-09-2026

**तन्मय सरकारः**
गवेषकः (Ph.D),
तिलकामाझि भागलपुर विश्वविद्यालयः,
भागलपुरम्

**Correspondence:**
**तन्मय सरकारः**
गवेषकः (Ph.D),
तिलकामाझि भागलपुर विश्वविद्यालयः,
भागलपुरम्

# वेदान्तदर्शने सृष्टितत्त्वम्

**तन्मय सरकारः**

भारतीयषड्दर्शनेषु आस्तिकदर्शनेषु च वेदान्तदर्शनं अन्यतमं शाखा अस्ति, यानि उपनिषद्-भगवद्गीता-ब्रह्मसूत्राणाम् (प्रस्थानत्रयी) आध्यात्मिकशिक्षायाः आधारेण विकसितमस्ति। वेदान्तशब्दस्य अर्थः वेदस्य 'अन्तः' अथवा अन्तिमभाग इति। अस्य दर्शनस्य मुख्यम् उद्देश्यं जीवात्म-जगत्-परमब्रह्मणाम् वास्तविकस्वरूपं तथा च तेषां पारस्परिकसम्बन्धं निरूपयितुमस्ति। वेदान्तदर्शनस्य मुख्यः आधारः वेदस्य ज्ञानकाण्डः अथवा उपनिषद् अस्ति। महर्षिः बादरायणः स्वकीये 'ब्रह्मसूत्र' ग्रन्थे उपनिषदाम् एतान् आपाततः विरोधिप्रतीयमानान् मन्त्रान् एकत्र सुसम्बद्धं च अकरोत्। अनन्तरं विभिन्नभाष्यकारैः अस्य ब्रह्मसूत्रस्य भिन्नाः व्याख्याः भाष्याणि च रचितानि, तत एव च भिन्नभिन्नमतानां (सम्प्रदायानां) जन्म अभवत्। उपनिषत्सु कुत्रचित् ब्रह्म निराकाररूपेण, पुनः कुत्रचित् साकाररूपेण वर्णितमस्ति। किन्तु महर्षिः बादरायणः स्वकीये ग्रन्थे दर्शितवान् यत् एतानि परस्परविरोधीनि न सन्ति, अपितु एकस्यैव परमार्थस्य भिन्नाः दृष्टिकोणाः सन्ति। जीवात्मा (जीवः) परमात्मा (ब्रह्म) च अनयोः पारस्परिकः सम्बन्धः कीदृशः इति अस्मिन् ग्रन्थे सूत्ररूपेण संयोजनं कृतं वर्तते। ब्रह्मसूत्रस्य' भाषा अतीव संक्षिप्ता सांकेतिका च अस्ति, अतः भाष्यकाराणां व्याख्यां विना अस्य वास्तविकार्थस्य अवगमनं सर्वथा असम्भवम् अस्ति। भारतस्य महान्तः दार्शनिकाः एतेषां सूत्राणाम् उपरि निबन्धान्, भाष्याणि, व्याख्याः च विलिख्य वेदान्तस्य भिन्नानां दार्शनिकसिद्धान्तानां प्रवर्तनं कृतवन्तः।वेदान्तदर्शनं मुख्यरूपेण त्रिषु 'आध्यात्मिकस्तम्भेषु' आधारितम् अस्ति, यानि सम्मिल्य 'प्रस्थानत्रयी' इति उच्यन्ते। वेदान्तदर्शनं मुख्यरूपेण त्रिषु 'आध्यात्मिकस्तम्भेषु' आधारितम् अस्ति, यानि सम्मिल्य 'प्रस्थानत्रयी' इति उच्यन्ते। तानि यथा —श्रुतिप्रस्थानम् –( उपनिषदः), न्यायप्रस्थानम् ( महर्षिबादरायणरचितं ब्रह्मसूत्रम्), च स्मृतिप्रस्थानम् - (श्रीमद्भगवद्गीता) ।

वेदान्तदर्शने मन्यते यत्, जगतः सृष्टितत्त्वं केवलं काचित् बाह्या घटना नास्ति, एतत् एकं गभीरं आध्यात्मिकं दार्शनिकं च विश्लेषणं वर्तते। वेदान्तस्य मूलभित्तिः प्रस्थानत्रयी (उपनिषद्, ब्रह्मसूत्रं, भगवद्गीता च) अस्ति। वेदान्तमते इदं दृश्यमानं जगत् न तु शून्यात् अथवा कस्माच्चित् बाह्यवस्तुनः उत्पन्नम्, अपितु परमब्रह्मैव जगतः एकमात्रम् आदिकारणं वर्तते।

**ब्रह्मसूत्रस्य प्रथमाध्याये उक्तमस्ति —**
**"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"।**[1]

अत्र अर्थमस्ति 'ब्रह्म' केवलम् जगतस्य स्रष्टा (निमित्तकारणं) नास्ति, सः स्वयमेव जगतः उपादानकारणम् अपि अस्ति।' उदाहरणस्वरुपम् एतत् लूता (मर्कटकः) स्वललायां जालं रचयति,स्व स्वयमेव च तस्य उपादानं भवति, ब्रह्माऽपि तथैव । छान्दोग्योपनिषदे वर्णितमस्ति यत्, एकविज्ञानेन सर्वविज्ञानं भवति (यथा एकस्य मृत्पात्रस्य ज्ञानेन सर्वेषां मृत्पात्राणां ज्ञानं भवति) । यदि 'ब्रह्म' उपादानकारणं न भूत्वा केवलं निमित्तकारणम् अभविष्यत्, तर्हि ब्रह्मज्ञानेन जगतः ज्ञानं न अभविष्यत्।

साङ्ख्यदर्शनस्य आक्षेपः अस्ति यत् ब्रह्म चेतनं जगत् च जडम्, अतः विलक्षणत्वात् चेतनात् जडस्य उत्पत्तिः असम्भवा। अस्मिन् विषये सूत्रकारेनोक्तम् —

**अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥**[2]

**दृश्यते तु ॥**[3]

तार्किकं विवेचनम्: लोके दृश्यते यत् चेतनात् पुरुषात् जडानां नखकेशादीनां उत्पत्तिः भवति। पुनः जडात् गोमयात् चेतनानां वृश्चिकादीनां जन्म भवति। अतः परमचेतनात् ब्रह्मणः जडजगतः उत्पत्तिः पूर्णतः युक्तिसङ्गता। जगत् कारणात् (ब्रह्मणः) पृथकं नास्ति। सृष्टेः पूर्वेऽपि जगतः ब्रह्मणि सूक्ष्मरूपेण आसीत्।

**तदनन्यत्वमारम्भणशब्दादिभ्यः॥**[4]

तार्किकं विवेचनम्: 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतिमाश्रित्य सूत्रकारः साधयति यत् कार्यं (जगत्) कारणात् (ब्रह्मणः) भिन्नं नास्ति। घटः यथा मृत्तिकायाः विकारः मात्रम्, तथा जगत् ब्रह्मणः एव विवर्तः परिणामो वा।

सृष्टेः प्रयोजनम्: केवलम् ईश्वरस्य लीलावत्त्वम्। पूर्णकामस्य ईश्वरस्य किं प्रयोजनं जगत्सृष्टौ? तत्र उत्तरं ददाति सूत्रकारः—

**लोकवत्तु लीलाकैवल्यम्॥**[5]

तार्किकं विवेचनम्: यथा लोके कश्चित् राजा आप्तकामः सन् केवलं विनोदार्थं क्रीडति, तथैव ईश्वरस्य इयं जगत्सृष्टिः तस्य स्वभावसिद्धा आनन्दमयी लीला एव। अत्र ईश्वरस्य कोऽपि स्वार्थः नास्ति। जगते केचन सुखनः केचन च दुःखिनः, अतः ईश्वरः पक्षपाती क्रूरश्च इति दोषः न भवति।

**वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥**[6]

तार्किकं विवेचनम्: ईश्वरः न तु स्वेच्छया कस्मैचित् सुखं दुःखं वा ददाति। सः जीवानां पूर्वकृतकर्मानुसारं (धर्माधर्मसापेक्षं) सृष्टिं वैचित्र्ययुक्तां करोति। यथा पर्जन्यः (मेघः) सर्वत्र समानं वर्षति, किन्तु बीजानां सामर्थ्यात् क्वापि व्रीहिः क्वापि च कण्टकः जायते; तथैव ईश्वरः साधारणकारणं भवति, असाधारणकारणं तु जीवस्य कर्म।

यदि प्रथमसृष्टेः पूर्वं कर्म नासीत्, तर्हि वैषम्यं कथम्? तत्र उच्यते—

**न कर्माविभागादिति चेन्नानादित्वात् ॥**[7]

तार्किकं विवेचनम्: संसारः अयं अनादिः अस्ति। बीजाङ्कुरवत् सृष्टिः कर्म च द्वावपि अनादिकालतः प्रचलतः। अतः पूर्वपूर्वसृष्टेः कर्मानुसारं उत्तरोत्तरा सृष्टिः प्रवर्तते ,चेतनं विना केवलं जडा प्रकृतिः जगद्रचनां कर्तुं न शक्नोति।

**रचनानुपपत्तेश्च नानुमानम् ॥**[8]

तार्किकं विवेचनम्: अचेतना घटिका वा प्रासादः वा चेतनं शिल्पिं विना स्वतः न निर्मितो भवति। तथा एव इयं विचित्रा जगद्रचना केनापि चेतनेन अधिष्ठात्रा (ब्रह्मणा) विना केवलया जडप्रकृत्या वा परमाणुभिः असम्भवा।

अतः ब्रह्मसूत्रानुसारं ब्रह्मैव जगतः आदि, मध्यं, अन्तश्च अस्ति। ब्रह्मणः मायाशक्त्या एतस्य नामरूपात्मकस्य जगतः अभिव्यक्तिः भवति, प्रलयकाले च पुनः इदं जगत् ब्रह्मणि एव लीनं भवति।

वेदान्ते सत्कार्यवादं स्वीकरोति, यस्यार्थः सृष्टेः पूर्वमपि कार्यं (जगत्) कारणे (ब्रह्मणि) सूक्ष्मरूपेण आसीत्। अत्र श्रुतिप्रमाणम्

**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥**[9]

विवर्तवादः (अद्वैतवेदान्तः): ब्रह्मणः वास्तविकं रूपान्तरं न भवति। मयावशात् ब्रह्म एव जगद्रूपेण भासते, यथा अन्धकारे रज्जौ सर्पभ्रमः।परिणामवादः (विशिष्टाद्वैतवेदान्तः): ब्रह्मणः सूक्ष्मा चित्-अचित् शक्तिः स्थूलरूपेण परिणमते, यथा दुग्धं दधिरूपेण परिणमते। जगते दृश्यमानस्य सुख-दुःख-वैषम्यस्य कृते ईश्वरः पक्षपाती क्रूरश्च नास्ति, यतः सः जीवानां कर्मानुसारं सृष्टिं करोति। ब्रह्मसूत्रेव-र्णितमस्ति यत्-

**वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥**[10]

यथा मेघः सर्वत्र समानं वर्षति, किन्तु बीजानां सामर्थ्यात् क्वापि धान्यादिकं क्वापि च कण्टकवृक्षाः जायन्ते; तथैव ईश्वरः साधारणकारणं भवति, जीवानां पूर्वकृतकर्माणि (धर्माधर्मौ) तु असाधारणकारणं भवन्ति। एषः संसारश्च अनादिः अस्ति **"नानादित्वात्"**[11]

सूक्ष्मभूतेभ्यः (आकाश-वायु-अग्नि-जल-पृथिवीभ्यः) दृश्यमानस्य स्थूलजगतः निर्माणं कथं भवति, तत्र पञ्चीकरणसिद्धान्तः प्रमुखाधारः अस्ति।

**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥**[12]

अर्थात् पञ्चानां सूक्ष्मभूतानां प्रत्येकं भागद्वयं (१/२) क्रियते। ततः एकैकं भागं पुनः चतुर्धा (१/८) विभज्यते, स्व स्व अर्धांशं विहाय अन्येषां भूतानां चतुर्भिः अंशैः सह योज्यते। अनेन प्रकारेण पञ्चीकृताः स्थूलभूताः जायन्ते, यतः ब्रह्माण्डस्य उत्पत्तिर्भवति।

अद्वैतवेदान्तानुसारं सृष्टिः अविद्यायाः (अज्ञानस्य) परिणाममात्रं वर्तते, तथापि ब्रह्म एव पुनः पुनः जगतः कारणत्वेन तथा च सर्वस्य व्यक्त-अव्यक्त-पदार्थस्य सारतत्वेन (अधिष्ठानत्वेन) निरूप्यते। ईश्वरस्य सृष्ट्युत्पादने किं प्रयोजनं (किं वा कारणं) इत्यस्मिन् विषये विविधाः विचाराः सन्ति, परन्तु एतेषु कश्चिद् अपि विचारः पूर्णतः अकाट्यः अकाल्पनिकः वा न मन्यत भौतिकप्रपञ्चः पञ्चीकरणप्रक्रिया च अयं भौतिकः प्रपञ्चः ब्रह्मणः आत्मविकासदशायाम् अभिव्यक्तिः अस्ति। अद्वैतवेदान्तानुसारं विश्वप्रपञ्चः ब्रह्मणः विवर्तः तथा च मायायाः परिणामः वर्तते। अद्वैतवेदान्ते 'माया' शब्दः बहुष्वर्थेषु (अविद्या, अनिर्वचनीया अर्थात् ब्रह्मणः अपृथक् सिद्धा शक्तिः इत्यादिषु) प्रयुज्यते। एकेन रूपेण इदं प्रकृतेः एव अपरं नाम अस्ति। माया स्वतः ब्रह्माण्डस्य मूलकारणं भवितुं न अर्हति, अपि तु सा ईश्वरस्य सहायिका भूत्वा तस्मात् विश्वं जनयति। इयं माया ब्रह्मणः

स्वतन्त्रा नास्ति; मायासहितं ब्रह्म एव 'सगुणं ब्रह्म' अथवा 'ईश्वरः' इति कथ्यते। माया ईश्वरस्य सा शक्तिः अस्ति यया सः सम्भाव्यं (अव्यक्तं) रूपं वास्तविकजगद्रूपेण परिणमयति। ईश्वरात् (देवात्) प्रकृतिः उत्पद्यते, या क्रमशः पञ्चसूक्ष्मभूतानां प्रकटीकरणस्य आधारः भवति, यत्र 'आकाशः' सर्वप्रथमं प्रकटीभवति। अतः उच्यते यत् समग्रं जगत् ईश्वरात् उत्पद्यते, यत्र आकाशः प्रथमं उत्पद्यते, ततः अन्यानि भूतानि क्रमेण उत्पद्यन्ते। उपनिषदः अपि एतस्य मतस्य समर्थनं कुर्वन्ति। आकाशः अवकाशरूपः तथा च सर्वव्यापकः अतीव सूक्ष्मपदार्थः मन्यते।

वास्तवतः आकाशात् अन्यानि सूक्ष्मभूतानि (सूक्ष्ममहाभूतानि) उत्पद्यन्ते यानि 'अपञ्चीकृतानि' भवन्ति, तथा च जगतः स्थूलपदार्थाः (स्थूलमहाभूतानि, पञ्चीकृतानि) एतेषाम् एव सूक्ष्मभूतानां विविधमिश्रणेन निर्मिताः भवन्ति। आकाशात् अन्यानि सूक्ष्मभूतानि आरोहक्रमेण उत्पद्यन्ते; आकाशात् वायुः, वायोः अग्निः, अग्नेः आपः (जलम्), अद्भ्यः च क्षितिः (पृथिवी) प्रजायते। एतेषां सर्वेषां भूतानां स्वकीयाः विशेषाः गुणाः सन्ति। एतेषां तन्मात्राणां सात्त्विकांशात् भिन्न-भिन्न-अनुपाते पञ्च ज्ञानेन्द्रियाणि मनः च उत्पद्यन्ते; राजसांशात् च पञ्चीकरणं तथा जगत्प्रपञ्चःभूतं अन्यानां भूतानां काँश्चित् गुणान् धारयति। पञ्चीकरणस्य इयं प्रक्रिया इत्थं प्रदर्श्यते— एते स्थूलपदार्थाः (स्थूलमहाभूतानि) विकारेण (परिणामेन) विभिन्नप्रकारकाणां वस्तूनाम् अथवा अनन्तानां नामरूपाणां सृष्टिं कुर्वन्ति। समग्रं ब्रह्माण्डं सप्त-ऊर्ध्वलोकैः (भूः, भुवः, स्वः, महः, जनः, तपः, सत्यं च), सप्त-अधोलोकैः (अतल, वितल, सुतल, रसातल, तलातल, महातल, पाताल च) तथा च सर्वेषां जीवानां स्थूलशरीरैः निर्मितं वर्तते। अस्य भौतिकब्रह्माण्डस्य व्यवस्थित-विकास-प्रक्रियायाः पृष्ठतः ईश्वरस्य अन्तर्यामिणी क्रिया (सङ्कल्पः) वर्तते। श्रुतौ तु प्रपञ्चस्य सत्त्वे आनयनाय 'त्रिवृत्करण' प्रक्रिया वर्णिता अस्ति, यथा नामरूपात्मकं जगत् अस्तित्वे आगच्छति । एतत् ब्रह्मसूत्रे अपि उल्लिखितं वर्तते। इत्थम् अद्वैतवेदान्तेन सृष्टिविज्ञानस्य (सृष्टिप्रक्रियायाः) एकं विशदं वर्णनं प्रस्तुतं कृतमस्ति।

**सन्दर्भसूचयः**

1. ब्रह्मसूत्रम् १.४.२३
2. तदेव १.२.५
3. तदेव २.१.६
4. तदेव २.१.२४
5. तदेव २.१. ३३
6. तदेव २.१.३४
7. तदेव २.१.३५
8. तदेव २.२.१
9. छान्दोग्योपनिषद् ६.२.१
10. ब्रह्मसूत्रम् २.१.३४
11. तदेव २.१.३५
12. स्वामी विद्यारण्यप्रणीता पञ्चदशी १.२७